শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

পলক্কুলম্ ত্রিৱিক্রমন্ নম্বূদিরি ৱিরচিতম্

# ॥ শ্রী গুরুমরুৎপুরাধীশস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী গুরুমরুৎপুরাধীশস্তোত্রম্ ॥

গরুডৱাহনং পুণ্যদর্শনং ৱরঝষাকৃতিং ৱেদসঙ্গ্রহম্।
প্রলযকালজীৱাত্মতারকং গুরুমরুৎপুরাধীশমাশ্রযে ॥ 1 ॥

প্রণৱমানসং প্রাণজীৱনং প্রকটকচ্ছপাকারমীশ্ৱরম্।
অমৃতদাযকং নিত্যনূতনং গুরুমরুৎপুরাধীশমাশ্রযে ॥ 2 ॥

সুকৃতকল্পকং সামতোষিতং সকলৱৈষ্ণৱাকারসূকরম্।
ভুৱনভূষণালঙ্কৃতং ৱিভুং গুরুমরুৎপুরাধীশমাশ্রযে ॥ 3 ॥

ৱরদমীশ্ৱরং নারসিংহকং ৱপুষি ভীকরং পুণ্যপূরকম্।
সুরগণাৱৃতং ভক্তৱৎসলং গুরুমরুৎপুরাধীশমাশ্রযে ॥ 4 ॥

চরিতৱিশ্রুতং ৱামনাকৃতিং পরমপূরুষং যাগসাধকম্।
পরপদপ্রদং পাপনাশকং গুরুমরুৎপুরাধীশমাশ্রযে ॥ 5 ॥

ভৃগুকুলোদ্ভৱং রামনামকং সুগুণভাসুরং রেণুকাত্মজম্।
নৃৱরতাপসং কেরলাধিপং গুরুমরুৎপুরাধীশমাশ্রযে ॥ 6 ॥

দশরথাত্মজং রামভদ্রকং শরধনুর্ধরং রাৱণান্তকম্।
পুরুষমৱ্যযং শ্রীনিকেতনং গুরুমরুৎপুরাধীশমাশ্রযে ॥ 7 ॥

ৱরহলাযুধং রোহিণীসুতং গিরিধরাগ্রজং রামদৈৱতম্।
গজগণপ্রিযং ধীমতাং ৱরং গুরুমরুৎপুরাধীশমাশ্রযে ॥ 8 ॥

ধৃতসুদর্শনং কৃষ্ণমচ্যুতং ৱিজযসারথিং গীতসারসম্।
পশুপগোপিকানর্তনপ্রিযং গুরুমরুৎপুরাধীশমাশ্রযে ॥ 9 ॥

দশৱিধাকৃতিং কল্কিৱৈভৱং ভুজগতল্পগং ভূতভাৱনম্।
নিখিলরোগসংহারকারকং গুরুমরুৎপুরাধীশমাশ্রয়ে॥ **10** ॥

দশককীর্তনং শ্রীধরাত্মকং পদমনামযং ঈশ্ৱরার্পিতম্।
পরমমঙ্গলং ভাগ্যদাযকং গুরুমরুৎপুরাধীশমাশ্রয়ে॥ **11** ॥

॥ ইতি শ্রী গুরুমরুৎপুরাধীশস্তোত্রং সমাপ্তম্॥